संस्कृत

पोनं
क्र.नं. १

स्तोत्रे

अपामार्जन स्तोत्र

६१८/स्तो ४१०

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

अथअपामार्जनस्तोत्रप्रारंभः

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

अ. मा.

श्रीगणेशायनमः॥ ॥अथातःसंप्रवक्ष्यामिअपामा

१ र्जनमुत्तमं॥पुलस्त्येनयथाप्रोक्तंदाल्भ्यस्यमहात्मनः

(2) ॥१॥सर्वेषांरोगदोषाणांनाशनंमंगलप्रदं॥विष्णुध

र्म्मोत्तरेप्रोक्तंसर्वपापहरंपरं॥२॥चैतन्यंसर्वगंसूक्ष्मं

विक्रियाकालवर्जितं॥नोदितंपरमानंदंतस्मैसब्रह्म

णेनमः॥३॥श्रीदाल्भ्यउवाच॥भगवन्प्राणिनःस

र्वेविषरोगाद्युपद्रवैः॥दुष्टग्रहोपघातैश्चसर्वकालमु

पद्रुताः॥४॥अभिचारककृत्याभिस्पर्शरोगैश्चदारु १

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

2A

ग्रैः ॥ सदासंपीड्यमानास्तेतिष्टंतिमुनिसत्तम ॥ ४ ॥ येन
कर्मविपाकेनविषरोगाद्युपद्रवाः ॥ नभवंतिनृणांत
न्मेयथावद्वक्तुमर्हसि ॥ ५ ॥ पुलस्त्यउवाच ॥ व्रतोप
वासैर्यैर्विष्णुनान्यजन्मनितोषितः ॥ तेनरामुनिशार्दू
लग्रहरोगादिभागिनः ॥ ६ ॥ यैर्नतस्यवणंचित्तंसर्वदैव
नरैः कृतं ॥ विषग्रहज्वराणांतेमनुष्याः दाल्भ्यभागि
नः ॥ ७ ॥ आरोग्यंपरमामृद्धिंमनसायद्यदिच्छति ॥ तत्त
दाप्नोत्यसंदिग्धंपरमाच्युततोषकृत् ॥ ८ ॥ नाधीशाप्नो

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

अ·मा·
२
(3)

तिनव्याधीनविषग्रहबंधनं ॥ कृत्यास्पर्शभयंवापितो
षितेमधुसूदने ॥ ९ ॥ सर्वदुष्टसमस्तस्य सौम्यास्तस्य
सदाग्रहाः ॥ देवानामथधृष्योसौ तुष्टो यस्यजनार्द
नः ॥ १० ॥ यः समःसर्वभूतेषु यथात्मनितथापरे ॥
उपवासादिनातेनतोषितो मधुसूदनः ॥ ११ ॥ तोषि
तेतत्रजायंतेनराः पूर्णमनोरथाः ॥ अरोगाः सुखि
नोभोगभोक्तारोमुनिसत्तम ॥ १२ ॥ नतेषांशत्रवोनै
वस्पर्शरोगाभिचारकं ॥ ग्रहरोगादिकंवापिपाप २

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

3A

कार्येनजायते ॥१३॥ अव्याहतानिकृष्णस्यचक्रादीन्या
युधानिच ॥ रक्षंतिसकलापद्भ्योयेनविष्णुरुपासितः
॥१४॥ दाल्भ्यउवाच ॥ अनाराधितगोविंदायेनराः
दुःखभाजिनः ॥ तेषांदुःखाभिभूतानांयत्कर्त्तव्यंदया
लुभिः ॥१५॥ पश्यद्भिःसर्वभूतस्थंवासुदेवंमहामुने
॥ समदृष्टिभिरीशेषंतन्मेब्रूहिविशेषतः ॥१६॥ श्रीपु
लस्त्यउवाच ॥ तद्वक्ष्यामिमुनिश्रेष्ठसमाहितमनाःशृ
णु ॥ नीलोत्पलदलश्यामपीतांबरधरंहरिं ॥१७॥ शखं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

चक्रगदापाणिं ध्यात्वा पामार्जनं जपेत् ॥ सौवर्णं राजतं
ताम्रं मृण्मयं वा नवं दृढं ॥ १८ ॥ अव्रणं कलशं पूर्णं स्था
पयेत्तंडुलोपरि ॥ तत्रोदकं समानीय शुद्धं निर्मल
मेव च ॥ १९ ॥ विष्णुं च पूजयेत्तत्र उपचारैः समंत्रकैः
॥ दर्भाणां च शतं चैकं स्थापयेत्कलशोपरि ॥ २० ॥ विरं
चिनाम सहोत्पन्न परमेष्ठि निसर्गज ॥ नुद सर्वाणि पा
पानि दर्भ स्वस्तिकरो भव ॥ २१ ॥ कुशमूले स्थितो ब्रह्मा
कुशमध्ये जनार्दनः ॥ कुशाग्रे शंकरं देवं त्रयो देवाः



Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

4A

कुशेस्थिताः ॥ २२ ॥ शारीरेयस्यतिष्ठंतिकुशोथाःजल
विंदवः ॥ नस्पृशंतितस्यपापानिगरुडेनेवपन्नगाः ॥ २३
गृहीत्वातुसमुल्लासान्कुशान्शुद्धेनपःस्पृशेत ॥ मा
र्जयेत्सर्वगात्राणि ॥ कुशाग्रैर्दुःखल्पशांतिकृत ॥ २४ ॥
विष्णुभक्तोविशेषेणशुचिस्तत्परमानसः ॥ रोगग्रह
विषार्त्तानांकुर्याच्छांतिमिमांशुभां ॥ २५ ॥ वराहंनारसिं
हंचवामनंविष्णुमेवच ॥ ध्यात्वासमाहितोभूत्वादिक्षु
नामादिविन्यसेत ॥ २६ ॥ नरसिंहंचसमभ्यर्च्यमुचोदे

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्री·मा
४
(5)

न्नो कुशासने मंत्रैरेतैर्यथालिंगं कुर्य्याद्दिग्बंधनादिकं
॥२४॥ पूर्वे नारायणः पातु वारिजाक्षस्तु दक्षिणे ॥ प्रद्यु
म्नः पश्चिमे पातु वासुदेवस्तथोत्तरे ॥२५॥ ऐशान्यां र
क्षको विष्णुर्वैश्वानर्यां जनार्दनः ॥ नैरृत्यां पद्मनाभस्तु
वायव्यां मधुसूदनः ॥२६॥ ऊर्ध्वं गोवर्धनो देवोऽधरायां
तु त्रिविक्रमः ॥ एताभ्यो दशदिग्भ्यस्तु सर्वतः पातु
केशवः ॥२७॥ जले रक्षतु वाराहः स्थले रक्षतु वामनः
अटव्यां नारसिंहश्च सर्वतः पातु केशवः ॥२८॥ एवं ४

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

5A

कृत्वातुदिग्बंधंविष्णुसर्वत्रसंस्मरेत् ॥ अव्यग्रचित्तः
कुर्वीतन्यासकर्मयथाविधि ॥ ३४ ॥ अंगुष्ठाग्रेतुगोविं
दंतर्जन्यांतुमहीधरं ॥ मध्यमायांहृषीकेशमनामिका
यांत्रिविक्रमं ॥ ३५ ॥ कनिष्ठिकायांन्यसेद्विष्णुंकरमध्ये
तुमाधवं ॥ करन्यासविधिंकृत्वाततोंगन्यासमारभेत् ॥
॥ ३६ ॥ शिखायांकेशवंन्यस्यमूर्ध्निनारायणंन्यसेत् ॥
मालाधरंललाटेतुगोविंदंतुभ्रुवोर्न्यसेत् ॥ ३७ ॥ चक्षुर्म
ध्येन्यसेद्विष्णुंकर्णयोर्मधुसूदनं ॥ त्रिविक्रमंगंडयुग्मे

A project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वामनंकर्णमूलयोः॥३६॥दामोदरंदंतपंक्तौवाराहं
चिबुकेतथा॥उत्तरोष्ठेहृषीकेशंपद्मनाभंतथाध
रे॥३७॥जिह्वायांवासुदेवंचतालौचगरुडध्वजं॥वै
कुंठंकंठमध्येतुअनंतंनासिकोपरि॥३८॥दक्षिणेतु
भुजेविप्रविन्यसेत्पुरुषोत्तमं॥वामकेतुमहायोगं
राघवंहृदिविन्यसेत्॥३९॥भुजांतरेतुविश्वेशंग्रीवा
यांमाधवंन्यसेत्॥वक्षस्थलेश्रीनिवासंकुक्षौकाम
देवंन्यसेत्॥४०॥जठरेदेवदेवेशंस्तनयोश्चमहीध



" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

6A

रं॥ पीतांबरं सर्वनानौद्धरिं नाभ्यांतु विन्यसेत्॥४१॥ क्रू
रेतु दक्षिणे विप्र ततः संकर्षणं न्यसेत्॥ वामे रिपुंदरं
विद्यात्कटिमध्ये पराजितं॥४२॥ पृष्ठे क्षितिधरं विद्या
दच्युतं स्कंधयोर्द्वयोः माधवं वामकुक्षौ तु दक्षिणे यो
गशायिनं॥४३॥ पार्श्वयोः पुष्कराक्षं च सर्वतो विश्वरू
पिणं॥ अंगेषु विन्यसेदात्मा वासुदेवं गुदेव्ययं॥४४
स्वायंभुवं मेढ्रमध्ये तूर्वोश्चैव गदाधरं॥ चक्रिणं जानुम
ध्ये तु जंघयोरजितं न्यसेत्॥४५॥ गुल्फयोर्न्नारसिंहं तु

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

अ॰ मा॰ ६ पादपृष्ठेमितौजसं ॥ अंगुलीषु श्रीधरं च पद्माक्षं सर्वसं
धिषु ॥४६॥ नखेषु केशवं न्यस्य न्यसेत्पादतले च्युतं ॥ रो
मकूपे गुडाकेशं कृत्स्नं रन्ध्रास्थिमज्जसु ॥४७॥ मनोबु
द्धिरहंकारश्चित्तोन्न्यसेज्जनार्दनः ॥ इत्यमेकोनपंचास
न्न्यासं कुर्यादतंद्रितः ॥४८॥ मानसे चिंतयेद्देवं नाराय
णमनामयं ॥ नारायणश्चेतसि चांबुजेक्षणं चतुर्भुजं
शंखगदारिशुद्धधायुधं ॥ श्रीवत्सलक्ष्मगलशोभिकौस्तु
भंपीतांवरं सांद्रपयोदसौभगं ॥४९॥ महार्हवैडूर्यकि ६

(7)

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

7A

रीटंकुंडलत्विषांपरिष्वक्तमदस्त्रकुंतलं॥ तद्धामकांक्षं
गदकंकणादिभिर्विरोचमानंपुरुषंविचिंतयेत्॥५०॥
एवंन्यासविधिंकृत्वासाक्षान्नारायणोभवेत्॥ तनुर्वि
ष्णुमयीतस्ययावत्किंचिन्नभाषते॥५१॥ एवंन्यासंततः
कृत्वायत्कार्यंशृणुतद्द्विज॥ पादमूलेतुदेवस्यशंखंतत्रै
वविन्यसेत्॥५२॥ वनमालादिन्यस्यसर्वदेवाधिपूजि
तं गदांवक्षस्थलेचैवचक्रंचैवतुपृष्ठतः॥५३॥ श्रीवत्सां
कंकरेन्यस्यपंचांगंकवचंन्यसेत्॥ आपादमस्तकंचै

"Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

अ॰ मा॰ वविन्यसेत्पुरुषोत्तमं ॥५४॥ अपामार्जनकोन्यासः स
७ र्वव्याधिविनाशनः ॥ आत्मनश्च परस्यापि विधिरेषउ
(8) दाहृतः ॥५५॥ वैष्णवेन तु कर्त्तव्यं सर्वसिद्धिप्रदायकं
पूजाकाले तु देवस्य स्नानकाले तथैव च ॥५६॥ होमा
रंभे प्रकर्त्तव्यं त्रिसंध्यं तु विन्यसः ॥ आदौ कृत्वा तु
कवचं विष्णुरूपो भवेन्नरः ॥५७॥ अभयं सर्वभूतेषु।
विष्णुलोकं स गच्छति ॥ नीलोत्पलदलश्यामं पीतांबर
धरं हरिं ॥५८॥ शंखचक्रगदापाणिं ध्यात्वा पार्ज्जनं ७

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai. "

जपेत् ॥ वाराहरूपिणं देवं संस्मरन्नर्चयेज्जपेत् ॥ ७९
वृद्धस्त्वनुवृद्धक्रान्तेंद्रदंष्ट्रक्ललोचनं ॥ समस्तवेदवेदां
गयुक्तां गंभूषणैर्युतं ॥ ८० ॥ उद्धृत्य भूमिंहस्ताभ्यांपाता
लादुपगृह्यतां ॥ क्रोलिंग्य भूमिंशिरसामूर्ध्निजिघ्रंत
मच्युतं ॥ ८१ ॥ रत्नवैडूर्यमुक्ताद्यैर्भूषणैरुपशोभितं
ध्यातां वरधरं देवं शुद्धस्फमाल्यानुलेपनं ॥ ८२ ॥ इत्थं ध्या
त्वा तदात्मानं जपेन्नित्यं समतेंद्रियः ॥ अभूत्स्यामः स्वभ्व
जज्ञोपवीती सत्कौपीनश्चारु कृष्णाजिनश्रीच्छत्री दंडी

अ॰ मा॰ पुंडरीकायतताक्षः पायान्मायावामनो ब्रह्मचारि॥६३॥
८ अतिसुमलगात्रं रत्नपात्रस्थमन्नं स्फललितदधिखं
(९) डं पाणिना दक्षिणेन कलशममृतपूर्णं वामहस्ते दधा
नं॥ तरति सकलदुःखं वामनं भावयेद्यः॥६४॥ अस्य श्री
अपामार्जनस्तोत्रस्य पुलस्त्य ऋषिरनुष्टुप् छंदः॥ श्री
नृसिंहो देवता अच्युतानंतगोविंदेति शक्तिः हरामुक
स्य दुरितमिति बीजं तस्य हारककेशांत्तेति कीलकं॥
ज्वलत्पावकलोचनेति कवचं॥ वज्राधिकनखस्पर्शो ८

तिव्यापकंसमस्तारोगंभित्रखितार्थेजपेविनियोगः॥ॐ
नमःपरमार्थायपुरुषायमहात्मने॥अरूपरूपायव्या
पिनेपरमात्मने॥६५॥निःकलंकायशुद्धायध्यानयोग
रतायच॥नमस्कृत्वाप्रवक्ष्यामियत्तत्सिद्ध्यतुमेवचः॥६६
गोविंदपद्मनाभायवासुदेवायभूभृते॥नमस्कृत्वाप्रव
क्ष्यामियत्तत्सिध्यतुमेवच॥६७॥वाराहनारसिंहायवा
मनायमहात्मने॥नमस्कृत्वा०॥६८॥दामोदरायदेवा
य अनंतायमहात्मने॥नमस्कृत्वा०॥६९॥नारायणा

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

अ॰मा॰
१
(10)

यकृष्णायविष्णुविश्वेश्वरायच ॥ नमस्कृत्वा॰७०॥ त्रिवि
क्रमायरामायअनंतायमहात्मने ॥ नमस्कृत्वा॰॥७१॥
विष्टरश्रवसेतस्मैक्षीराब्धौनिधिशायिने ॥ नमस्कृत्वा॰॥
७२॥ हृषीकेशायकृष्णायमाधवायाच्युतायच ॥ नमः
७३॥ अधोक्षजायतार्क्ष्यायमत्स्यायमधुघातिने ॥ नमः
७४॥ प्रद्युम्नायानिरुद्धायनमःसंकर्षणायच ॥ नमः
७५॥ ॐनमोवासुदेवायउपेंद्रश्रीधरायच ॥ नमः॥७
६॥ वाराहनारसिंहेशावामनेशात्रिविक्रमः ॥ हयग्रीवे ९

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

10A

शाँहृषीकेशाद्दूरात्सुभ॥७७॥अपराजितचक्राद्यैश्चतु
र्भिः परमायुधैः॥अखंडितानुभावैस्त्वंसर्वदुष्टहरो भ
व॥७८॥हरामुकस्यदुरितंदुष्कृतंदुरुपोषितं॥मत्सुवं
धार्तिमयदंडुष्कृतस्यचयस्फल॥७९॥पराभिध्यानसं
हितंप्रयुक्तमभिचारिकं॥गरस्पर्शमहारोगप्रयोगं
जरयाजर॥८०॥हरयेवासुदेवायनमछ्कृस्णायखड्गि
ने॥नमः पुष्करनेत्रायकेशवायादिचक्रिणे॥८१॥म
हाँवरिपुस्कंधघृष्टचक्रायचक्रिणे॥दंष्ट्रोद्धृतक्षिति

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com